.. Bharata Bhakti Stotra ..

# ॥ भारत भक्ति स्तोत्रम् ॥

कराग्रे वसते लक्ष्मीः करमध्ये सरस्वती ।
करमूले तु गोविन्दः प्रभाते करदर्शनम् ॥ १॥
समुद्रवसने देवि पर्वतस्तनमण्डले ।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥ २॥
ब्रह्मा मुरारिस्त्रिपुरांतकारी भानुः ।
शशी भूमिसुतो बुधश्च ॥
गुरुश्च शुक्रः शनिराहुकेतवः ।
कुर्वन्तु सर्वे मम सुप्रभातम् ॥ ३॥
सनत्कुमारः सनकः सनन्दनः ।
सनातनोऽप्यासुरिपिङ्गलौ च ॥
सप्तः स्वराः सप्तरसातलानि ।
कुर्वन्तु सर्वे मम सुप्रभातम् ॥ ४॥
सप्तार्णवाः सप्तकुलाचलाश्च ।
सप्तर्शयो द्वीपवनानि सप्त ॥
भूरादि कृत्वा भुवनानि सप्त ।
कुर्वन्तु सर्वे मम सुप्रभातम् ॥ ५॥
पृथ्वी सगन्धा सरसास्तथापः ।
स्पर्शी च वायुर्ज्वलनं च तेजः ॥
नमः सशब्दं महता सहैव ।
कुर्वन्तु सर्वे मम सुप्रभातम् ॥ ६॥
महेन्द्रो मलयः सह्यो देवतात्मा हिमालयः ।
धेयो रैवतको विन्ध्यो गिरिश्चारावलिस्तथा ॥ ७॥
गङ्गा सिधुश्च कावेरी यमुना च सरस्वती ।
रेवा महानदी गोदा ब्रह्मपुत्रा पुनातु माम् ॥ ८॥
अयोध्या मथुरा माया काशी काञ्ची अवन्तिका ।
पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः ॥ ९॥
प्रयागं पाटलीपुत्रं विजयानगरं पुरीम् ।
इन्द्रप्रस्थं गयां चैव प्रत्यूषे प्रत्यहं स्मरेत् ॥ १०॥
अरुन्धत्यनुसूया च सावित्री जानकी सती ।
तेजस्विनी च पाञ्चाली वन्दनीया निरन्तरम् ॥ ११॥
लक्ष्मीरहिल्या चन्नम्मा मीरा दुर्गावती तथा ।
कण्णगी च महासाध्वी शारदा च निवेदिता ॥ १२॥
वैन्यं पृथुं हैहयमर्जुनं च
शाकुन्तलेयं भरतं नलं च ।
रामं च यो वै स्मरति प्रभाते
तस्यार्थ लाभो विजयश्च हस्ते ॥ १३॥
दध्यङ्ङनुर्भृगुरसौ हरिपूर्वचन्द्रो
भीश्मार्जुन ध्रुव वशिष्ठ शुकादयश्च ।
प्रह्लाद नारद भागीरथ विश्वकर्म
वाल्मीकयोऽत्र चिरचिन्त्य शुभाभिधानाः ॥ १४॥
अश्वत्थामा बलिर्व्यासो हनुमांश्च विभीषणः
कृपः परशुरामश्च सप्तैते चिरजीविनः ॥ १५॥
सप्तैतान्संस्मरेन्नित्यं मार्कण्डेयमथाष्टमम् ।
जीवेद्वर्षशतं साग्रमपमृत्युविवर्जितः ॥ १६॥
पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः ।
पुण्यश्लोको विदेहश्च पुण्यश्लोको जनार्दनः ॥ १७॥
बुद्धो जिनेन्द्रो गोरक्षः शङ्करश्च पतञ्जलिः ।
रामनुजोऽथ चैतन्यः कबीरो गुरुनानकः ॥ १८॥
ज्ञानेश्वरस्तुकारामः समर्थो मध्ववल्लभौ ।
नरसिस्तुलसीदासः कंबः साधुकुलोत्तमाः ॥ १९॥
नायन्माराल्वाराश्च तिरुवल्लुवरस्तथा ।
वितरन्तु सदैवैते दैवीं मे गुणसंपदम् ॥ २०॥
अगस्त्यः कंबुकौण्डिन्यौ राजेन्द्रशोलभूषणः ।
सर्वे दिग्जयिनः ख्याताः शैलेन्द्रो बप्परावलः ॥ २१॥
चाणक्यश्चन्द्रगुप्तश्च विक्रमः शालिवाहनः ।
अशोकः पुश्यमित्रश्च खारवेलः सुनीतिमान् ॥ २२॥
हूणजेता यशोधर्मा समुद्रो गुप्तवंशजः ।
श्रीकृष्णदेवरायश्च प्रदात हर्शवर्धनः ॥ २३॥
साधुः शङ्करदेवश्च तथा सायणमाधवौ ।
प्रतापः शिवराजश्च गोविन्दो बसवेश्वरः ॥ २४॥
रामकृष्णो दयानन्दो रवीन्द्रो राममोहनः ।
रामतीर्थोऽरविन्दश्च विवेकानन्द उद्यशाः ॥ २५॥
तिलको रमणश्चैव सुधीर्नारायणो गुरुः ।
महामना मालवीयो महात्मा गान्धिरेव च ॥ २६॥
केशवः संघनिर्माता हेडगेवारवंशजः ।
सन्ततं चिन्तयेदेतान् हिन्दुभूमिसुतोत्तमान् ॥ २७॥
अनुक्ता ये भक्ता हरिचरणसंसक्त हृदयाः ।
अविज्ञाताः वीरा अधिसमरमुध्वस्तरिपवः ॥
महात्मानः सन्तो भरतभुवि ये सन्ति च परे ।
नमस्तेभ्यो भूयादुषसिसकलेभ्यः प्रतिदिनम् ॥ २८॥
रत्नकराधौतपदां हिमालयकिरीटिनीम् ।
ब्रह्मराजर्शिरत्नाढ्यां वन्दे भारतमातरम् ॥ २९॥
प्रातःस्मरणमेतद्यो विदित्वाऽऽदरतः पठेत् ।
स सम्यग्धर्मनिष्ठः स्यात् संस्मृताखण्डभारतः ॥ ३०॥

॥ भारत माता की जय ॥

Please send corrections to sanskrit@cheerful.com
Last updated February 28, 1999